# શિવ તાંડવ સ્તોત્ર PDF

શ્રીશિવતાણ્ડવસ્તોત્રમ્ રાવણરચિતમ્

.. અથ રાવણકૃતશિવતાણ્ડવસ્તોત્રમ્ ..

.. શ્રીગણેશાય નમઃ ..

જટાટવીગલજ્જલપ્રવાહપાવિતસ્થલે

ગલેઽવલમ્બ્ય લમ્બિતાં ભુજઙ્ગતુઙ્ગમાલિકામ્ .

ડમડ્ડમડ્ડમડ્ડમન્નિનાદવડ્ડમર્વયં

ચકાર ચણ્ડતાણ્ડવં તનોતુ નઃ શિવઃ શિવમ્ .. ૧..

જટાકટાહસમ્ભ્રમભ્રમન્નિલિમ્પનિર્ઝરી–

-વિલોલવીચિવલ્લરીવિરાજમાનમૂર્ધનિ .

ધગદ્ધગદ્ધગજ્જ્વલલ્લલાટપટ્ટપાવકે

કિશોરચન્દ્રશેખરે રતિઃ પ્રતિક્ષણં મમ .. ૨..

ધરાધરેન્દ્રનન્દિનીવિલાસબન્ધુબન્ધુર

સ્ફુરદ્દિગન્તસન્તતિપ્રમોદમાનમાનસે .

કૃપાકટાક્ષધોરણીનિરુદ્ધદુર્ધરાપદિ

pdfinbox.com

ક્વચિદ્દિગમ્બરે(ક્વચિચ્ચિદમ્બરે) મનો વિનોદમેતુ વસ્તુનિ .. ૩..

જટાભુજઙ્ગપિઙ્ગલસ્ફુરત્ફણામણિપ્રભા

કદમ્બકુઙ્કુમદ્રવપ્રલિપ્તદિગ્વધૂમુખે .

મદાન્ધસિન્ધુરસ્ફુરત્ત્વગુત્તરીયમેદુરે

મનો વિનોદમદ્ભુતં બિભર્તુ ભૂતભર્તરિ .. ૪..

સહસ્રલોચનપ્રભૃત્યશેષલેખશેખર

પ્રસૂનધૂલિધોરણી વિધૂસરાઙ્ઘ્રિપીઠભૂઃ .

ભુજઙ્ગરાજમાલયા નિબદ્ધજાટજૂટક

શ્રિયૈ ચિરાય જાયતાં ચકોરબન્ધુશેખરઃ .. ૫..

લલાટચત્વરજ્વલદ્ધનઞ્જયસ્ફુલિઙ્ગભા-

-નિપીતપઞ્ચસાયકં નમન્નિલિમ્પનાયકમ્ .

સુધામયૂખલેખયા વિરાજમાનશેખરં

મહાકપાલિસમ્પદેશિરોજટાલમસ્તુ નઃ .. ૬..

કરાલભાલપટ્ટિકાધગદ્ધગદ્ધગજ્જ્વલ-

દ્ધનઞ્જયાહુતીકૃતપ્રચણ્ડપઞ્ચસાયકે .

ધરાધરેન્દ્રનન્દિનીકુચાગ્રચિત્રપત્રક-

pdfinbox.com

-પ્રકલ્પનૈકશિલ્પિનિ ત્રિલોચને રતિર્મમ .. ૭..

નવીનમેઘમણ્ડલી નિરુદ્ધદુર્ધરસ્ફુરત્-

કુહૂનિશીથિનીતમઃ પ્રબન્ધબદ્ધકન્ધરઃ .

નિલિમ્પનિર્ઝરીધરસ્તનોતુ કૃત્તિસિન્ધુરઃ

કલાનિધાનબન્ધુરઃ શ્રિયં જગદ્ધુરન્ધરઃ .. ૮..

પ્રફુલ્લનીલપઙ્કજપ્રપઞ્ચકાલિમપ્રભા-

-વલમ્બિકણ્ઠકન્દલીરુચિપ્રબદ્ધકન્ધરમ્ .

સ્મરચ્છિદં પુરચ્છિદં ભવચ્છિદં મખચ્છિદં

ગજચ્છિદાન્ધકચ્છિદં તમન્તકચ્છિદં ભજે .. ૯..

અખર્વ(અગર્વ)સર્વમઙ્ગલાકલાકદમ્બમઞ્જરી

રસપ્રવાહમાધુરી વિજૃમ્ભણામધુવ્રતમ્ .

સ્મરાન્તકં પુરાન્તકં ભવાન્તકં મખાન્તકં

ગજાન્તકાન્ધકાન્તકં તમન્તકાન્તકં ભજે .. ૧૦..

જયત્વદભ્રવિભ્રમભ્રમદ્ભુજઙ્ગમશ્વસ-

-દ્વિનિર્ગમત્ક્રમસ્ફુરત્કરાલભાલહવ્યવાટ્ .

ધિમિદ્ધિમિદ્ધિમિધ્વનન્મૃદઙ્ગતુઙ્ગમઙ્ગલ

pdfinbox.com

ધ્વનિક્રમપ્રવર્તિત પ્રચણ્ડતાણ્ડવઃ શિવઃ .. ૧૧..

દૃષદ્વિચિત્રતલ્પયોર્ભુજઙ્ગમૌક્તિકસ્રજોર્-

-ગરિષ્ઠરત્નલોષ્ઠયોઃ સુહૃદ્વિપક્ષપક્ષયોઃ .

તૃણારવિન્દચક્ષુષોઃ પ્રજામહીમહેન્દ્રયોઃ

સમં પ્રવર્તયન્મનઃ કદા સદાશિવં ભજે .. ૧૨..

કદા નિલિમ્પનિર્ઝરીનિકુઞ્જકોટરે વસન્

વિમુક્તદુર્મતિઃ સદા શિરઃ સ્થમઞ્જલિં વહન્ .

વિમુક્તલોલલોચનો લલામભાલલગ્નકઃ

શિવેતિ મન્ત્રમુચ્ચરન્ કદા સુખી ભવામ્યહમ્ .. ૧૩..

નિલિમ્પનાથનાગરીકદમ્બમૌલમલ્લિકા-

નિગુમ્ફનિર્ભરક્ષરન્મધૂષ્ણિકામનોહરઃ .

તનોતુ નો મનોમુદં વિનોદિનીમહર્નિશં

પરશ્રિયઃ પરં પદંતદઙ્ગજત્વિષાં ચયઃ .. ૧૪..

પ્રચણ્ડવાડવાનલપ્રભાશુભપ્રચારણી

મહાષ્ટસિદ્ધિકામિનીજનાવહૂતજલ્પના .

વિમુક્તવામલોચનાવિવાહકાલિકધ્વનિઃ

શિવેતિ મન્ત્રભૂષણા જગજ્જયાય જાયતામ્ .. ૧૫..

pdfinbox.com

ઇદમ્ હિ નિત્યમેવમુક્તમુત્તમોત્તમં સ્તવં
પઠન્સ્મરન્બ્રુવન્નરો વિશુદ્ધિમેતિસન્તતમ્ .
હરે ગુરૌ સુભક્તિમાશુ યાતિ નાન્યથા ગતિં
વિમોહનં હિ દેહિનાં સુશઙ્કરસ્ય ચિન્તનમ્ .. ૧૬..

પૂજાવસાનસમયે દશવક્ત્રગીતં
યઃ શમ્ભુપૂજનપરં પઠતિ પ્રદોષે .
તસ્ય સ્થિરાં રથગજેન્દ્રતુરઙ્ગયુક્તાં
લક્ષ્મીં સદૈવ  સુમુખિં પ્રદદાતિ શમ્ભુઃ .. ૧૭..

.. ઇતિ શ્રીરાવણવિરચિતં શિવતાણ્ડવસ્તોત્રં સમ્પૂર્ણમ્ ..

નમામિ પાર્વતીપતિં નમામિ જાહ્નવીપતિં
નમામિ ભક્તવત્સલં નમામિ ભાલલોચનમ્ .
નમામિ ચન્દ્રશેખરં નમામિ દુઃખમોચનં
તદીયપાદપઙ્કજં સ્મરામ્યહં નટેશ્વરમ્ .. ૧૬..

રાવણેન કૃતં સ્તોત્રં યઃ પઠેચ્છિવસન્નિધૌ .
પુત્રપૌત્રાદિકં સૌખ્યં લભતે મોક્ષમેવ ચ .. ૧૯..

ઇતિ દશકન્ધરવિરચિતં શિવતાણ્ડવસ્તોત્રં સમાપ્તમ્ .

pdfinbox.com

pdfinbox.com

pdfinbox.com